प्रपूर्वादुत्पूर्वाच्च नयतेः क्यप्। प्रणीयः (श. ब्रा. ३.१.३.१)। उन्नीयः (श. ब्रा. ३.५.१६.१२)। उत्पूर्वाच् छिषेः क्यप्। [1]उच्छिष्यः (मै. सं. ३.९.२)। 'मृङ् प्राणत्यागे' (धा. पा. १४०४), 'स्तृञ् आच्छादने' (धा. पा. १२५३), 'ध्वृ हूर्च्छने' (धा. पा. ९४०), एतेभ्यो यत् प्रत्ययः। मर्यः (तै. आ. १.३.२.)। स्तर्या (श.ब्रा. २.१.२.१०)। स्त्रियामेव [2]निपातनम्। ध्वर्यः। खनेर्यत्। खन्या (तै. सं. ७.४.१३.१)। एतस्मादेव ण्यत्। खान्यः। देवशब्दे उपपदे यजेर्यत्। [3]देवयज्या (ऋ. १०.३०.२१)। [4]स्त्रीलिङ्गनिपातनम्। आङ्पूर्वात् पृच्छेः क्यप्। आपृच्छ्यः (ऋ. १.६०.२)। प्रतिपूर्वात् सीव्यतेः क्यप् षत्वं च। प्रतिषीव्यः (मा. श्रौ. २.२.२.३५)। ब्रह्मण्युपपदे [5]वदेर्ण्यत्। ब्रह्मवाद्यम् (तै. सं. २.५.८.३)। भवतेः [6]स्तौतेश्च ण्यत्, आवादेशश्च भवति। भाव्यम् (अ.वे. १३.१.५४)। स्ताव्यः (म. भा. २.८८)। उपपूर्वस्य चिनोतेः ण्यद्आयादेशौ। उपचाय्यपृडम् (हिरण्यदक्षिणा) (का. सं. ११.१)। [7]पृडे चोत्तरपदे निपातनमेतत्।

[२२२] हिरण्य इति वक्तव्यम्। (म.भा. २.८८)

हिरण्यादन्यत्र [8]उपचेयपृडम् एव।

निष्टक्यें व्यत्ययं विद्यान्निसः षत्वं निपातनात्।
ण्यदायादेश इत्येतावुपचाय्ये निपातितौ॥

ण्यदेकस्माच्चतुर्भ्यः क्यप् चतुर्भ्यश्च यतो विधिः।
ण्यदेकस्माद् यशब्दश्च द्वौ क्यपौ ण्यद्विधिश्चतुः (म.भा. २.८८)॥

## ऋहलोर्ण्यत्। (१२४/२८७२)

पञ्चम्यर्थे षष्ठी। [9]ऋवर्णान्ताद् धातोर्हलन्ताच् च ण्यत् प्रत्ययो भवति। कार्यम्। हार्यम्। [10]धार्यम् [11]वाक्यम्। [12]पाक्यम्॥

## ओरावश्यके। (१२५/२८८६)

अवश्यंभावः आवश्यकम्। उवर्णान्ताद् धातोः ण्यत् प्रत्ययो भवति आवश्यके द्योत्ये। [13]यतोऽपवादः। लाव्यम्। पाव्यम्। आवश्यके इति किम्? [14]लव्यम्। आवश्यके द्योत्ये इति चेत्, स्वरसमासानुपपत्तिः, (म. भा. २.८८) [15]अवश्यलाव्यम्, अवश्यपाव्यम् इति? नैष दोषः। मयूरव्यंसकादित्वात् (२.१.७२/७५४) समासः[16]। [17]उत्तरपदप्रकृति[18]स्वरे च यत्नः करिष्यते॥

---

1. उच्छिष्यम् अ. ब. इ. फ. ग. 2. निपात्यते फ. 3. देवयज्यया ड. 4. स्त्रीलिङ्गे ब. 5. वदेः नास्ति ब. 6. स्तुवतेश्च ब. 7. पृड एवोत्तरपदे च ड. 8. उपचेयं वृष्टममेव क. 9. हलन्ताद् ऋवर्णान्ताद् धातोः फ. 10. धार्यम् पाक्यम् नास्ति फ. 11. हलन्तात् इत्यधिकम् फ. ह. 12. पाठ्यम् इत्यधिकम् अ. 13. यतोऽपवादः नास्ति ह. 14. पठ्यम् अ. क.ड.फ.ह. 15. °लाव्यः °पाव्यः ब. 16. भविष्यति इत्यधिकम् क. ड. 17. उपपद° अ. 18. स्वरत्वे ड. फ.